# अत्याग्रहः

कस्मिंश्चित् ग्रामे कश्चन ब्राह्मणकृषकः आसीत् । सः कृषिकार्याणि कृत्वा दिनानि नीतवान् । परन्तु तस्य क्षेत्रे फलसमृद्धिः न भवति स्म ।

कदाचित् सः क्षेत्रे कार्यं कुर्वन् आसीत् । तदा सः समीपे विद्यमानस्य वल्मीकस्य उपरि स्थितम् एकं सर्पम् दृष्टवान् । सः चिन्तितवान् – 'एषः सर्पः मम क्षेत्रपालः स्यात् । एतत् अजानन् अहम् एतावत्पर्यन्तम् एतस्य पूजां न कृतवान् । अतः एव मम कृषिकार्यं निष्फलं भवति । इतः परम् अहम् एतं निश्चयेन पूजयिष्यामि' इति ।

एवं चिन्तयित्वा सः कुतश्चित् किञ्चित् क्षीरम् आनीय पात्रे स्थापयित्वा वल्मीकस्य समीपम् आगत्य उक्तवान् – 'भोः क्षेत्रपाल, भवान् अत्रैव अस्ति इति एतावत्पर्यन्तं न ज्ञातवान् । अतः पूजां न कृतवान् । क्षम्यताम्' इति । अनन्तरं पात्रं तत्र स्थापयित्वा गृहम् आगतवान् ।

परेद्युः तत्र यदा गतं तदा पात्रे एकः नाणकं आसीत् । सः तं नाणकं स्वीकृतवान् । ततः आरभ्य सः एवमेव प्रतिदिनं क्षीरं समर्पितवान्, एकं नाणकं प्राप्तवान् च । एवमेव कानिचन दिनानि आतीतानि ।

कदाचित् ब्राह्मणः ग्रामान्तरं गतवान् । गमनसमये सः क्षेत्रपालस्य पूजां कर्तुं स्वपुत्रं आज्ञापितवान् । सः पुत्रः वल्मीकसमीपं गत्वा क्षीरं स्थापयित्वा आगतवान् । अनन्तरदिने नाणकं प्राप्तवान् । नाणकं दृष्ट्वा सः चिन्तितवान् । निश्चयेन एतस्मिन् वल्मीके प्रभूतं नाणकानि सन्ति । अतः एतं सर्पं मारयित्वा सर्वान् स्वीकरोमि इति । अनन्तरदिने क्षीरदानसमये सः दण्डेन सर्पं ताडितवान् । सर्पः रोषेण तं दष्टवान् । तेन सः पुत्रः मृतः । एवं सः मूर्खपुत्रः दुराशया स्वयमेव नष्टः ।

*   *   *